**SET – 4**

**Series : GBM/C**

**कोड नं.**
**Code No. 22**

**रोल नं.**
**Roll No.**

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*अवधि : होरात्रयम्* | *पूर्णाङ्काः : **100***
*निर्धारित समय : 3 घंटे* | *अधिकतम अंक : **100***
*Time allowed : **3** hours* | *Maximum Marks : **100***

**निर्देशा :**

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only unless stated otherwise.*

*अस्मिन् प्रश्नपत्रे* **चत्वारः** *खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में* **चार** *खण्ड हैं ।*

*There are* ***four*** *sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्ड: क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन ) | **10 अङ्का:** |
| SECTION A | : | (Unseen Reading Comprehension) | |
| खण्ड: ख | : | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | **15 अङ्का:** |
| SECTION B | : | (Sanskrit Writing Skills) | |
| खण्ड: ग | : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | **30 अङ्का:** |
| SECTION C | : | (Applied Grammar) | |
| खण्ड: घ | : | भाग I – पठितांश – अवबोधनम् (पठितांश – अवबोधन) | **35 अङ्का:** |
| SECTION D | : | PART I – Reading Comprehension<br>भाग II – सामान्य: संस्कृतसाहित्यपरिचय: | |
| | | (सामान्य संस्कृत साहित्य परिचय) | **10 अङ्का:** |
| | | PART II – General Introduction to Sanskrit Literature | |

## खण्ड: क (SECTION A) — 10 अङ्का:

**अपठितांश – अवबोधनम्**

**अपठितांश – अवबोधन**

**Unseen Reading Comprehension**

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत :
निम्नलिखित गद्यांश को पढ़कर प्रदत प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following passage and answer the given questions in Sanskrit.

**गद्यांश** :

विगतशताब्दीत: वैज्ञानिकी प्रगति: प्रत्येकं क्षेत्रे सततं प्रवर्धते । सर्वेषु क्षेत्रेषु नानाविधा: नूतना: आविष्कारा: विधीयन्ते । पुरा यत् असम्भवं प्रतीयते स्म, तत् साम्प्रतम् अतीव सुकरं जातम् । महाभारतकाले कुरुक्षेत्रे संजातं युद्धं संजय: दिव्यदृष्ट्या प्रत्यक्षमिव अपश्यत् । इदानीं सर्वेषु गृहेषु दूरदर्शनयन्त्रं वर्तते, येन वयं सर्वे दूरस्थक्षेत्रेषु अपि आयोज्यमानानां कार्यक्रमाणां साक्षात् प्रसारणं स्वगृहे एव पश्याम: । परम् अनया वैज्ञानिक्या प्रगत्या काचिद् हानिरपि संवृत्ता । वैज्ञानिकै: परमाणुक्षेत्रे या प्रगति: कृता, अतिसंहारकास्त्राणि च आविष्कृतानि तत: अद्य समस्तमपि जगद् भीतमिव दृश्यते । परमाणुशक्ते: उपयोग: विद्युदुत्पादनसदृशेषु शान्तिपूर्णकार्येषु तु श्रेष्ठ: परं विनाशकारिकार्येषु अनुचित: । यदि कदाचन एतानि परमाण्वस्त्राणि आतंकवादिनां हस्तेषु निपतेयु: तदा कीदृशी हानि: भविष्यति इति विचारयन्त: प्रबुद्धा नागरिका: परमाणुशस्त्रास्त्रमुक्तं विश्वं कामयन्ते ।

**प्रश्ना**:

(अ) एकपदेनोत्तरत : **½ × 4 = 2**
एक शब्द में उत्तर दीजिए :
Answer in one word.
(i) कीदृशी प्रगति: सततं प्रवर्धते ?
(ii) संजय: दिव्यदृष्ट्या किम् अपश्यत् ?
(iii) सर्वेषु गृहेषु किं दृश्यते ?
(iv) वैज्ञानिकै: कानि आविष्कृतानि ?

(ब) पूर्णवाक्येनोत्तरत : **1 × 2 = 2**

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence.

(i) प्रबुद्धा: नागरिका: किं कामयन्ते ?

(ii) परमाणुशक्ते: उपयोग: कुत्र अनुचित: ?

(स) यथानिर्देशमुत्तरत : **1 × 4 = 4**

यथानिर्देश उत्तर दीजिए :

Answer as directed.

(i) 'कामयन्ते' इत्यस्य कर्तृपदं किम् ?

(ii) 'कार्यक्रमाणाम्' इत्यस्य विशेषणं किम् ?

(iii) 'अधुना' इत्यर्थे किं पर्यायपदं प्रयुक्तम् ?

(iv) 'दूरस्थक्षेत्रेषु' इत्यस्य विलोमपदं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit.

## खण्ड: ख (SECTION B) — 15 अङ्का:

### संस्कृतेन रचनात्मककार्यम्

### संस्कृत रचनात्मक कार्य

### Sanskrit Writing Skills

2. भवान् वाराणसीनिवासी नचिकेता: । दुर्गापूजावकाशदिनेषु स्वमित्रं सुकेशं वाराणसीभ्रमणार्थं प्रेषिते पत्रे मञ्जूषात: पदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं पुन: लिखत: **½ × 10 = 5**

आप वाराणसी निवासी नचिकेता हैं । दुर्गापूजावकाश के अवसर पर अपने मित्र सुकेश को वाराणसी भ्रमण के लिए भेजे पत्र में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पत्र को पुन: लिखिए :

You are Nachiketa living in Varanasi. In a letter to your friend Sukesh, inviting him to visit Varanasi during Durga Pooja holidays, fill in the blanks with the help of the words given in the box and rewrite the same.

**पत्रम्**

वाराणसीत:,
दिनाङ्क : _______

प्रिय वयस्य सुकेश!

सप्रेम नमो नम:,

अत्र कुशलं तत्रास्तु । आगामिमासे तव दुर्गापूजावकाश: __(1)__ । एतदवसरे अहं त्वां विश्वस्य __(2)__ वाराणस्या: भ्रमणार्थं निमन्त्रयामि । __(3)__ अवस्थितेयं नगरी संस्कृताध्ययनस्य प्रमुखकेन्द्ररूपेण प्रसिद्धा । पुरा ह्वेन्त्सांग-इत्सिंग – नामकौ चीनदेशीया यात्रिणौ अपि अत्र आगतवन्तौ । अत्र गङ्गातटे प्रति सायं गङ्गाआरती आयोज्यते, यत्र घण्टानाद: __(4)__ श्रद्धालूनां मनांसि आहरत: । दृश्यमेतत् __(5)__ भवति । विगतवर्षे जापानदेशीय: __(6)__ अपि एतद् द्रष्टुम् अत्र समागत: । बहव: पर्यटका: अत्र गंगायां __(7)__ कुर्वन्ति । अत्रैव मणिकर्णिका – हरिश्चन्द्रेति ऐतिहासिके घाटस्थले स्त: । वाराणसीं निकषा बौद्धानां विश्वविख्यातं सारनाथनामकं __(8)__ वर्तते । यत्र भगवान् __(9)__ स्वीयं प्रथमं धर्मोपदेशं कृतवान् । अहं त्वां सर्वाणि स्थलानि __(10)__ मातापितृचरणेषु मे प्रणामाञ्जलय: । शीघ्रं मेलिष्याव: ।

भवदभिन्नहृदय:,
नचिकेता: ।

**मञ्जूषा**

| |
|---|
| दर्शयिष्यामि, भविष्यति, बुद्ध:, प्राचीनतमनगर्या:, तीर्थस्थानम्, गंगातटे, नौकायनम्, गंगालहरीश्लोकपाठश्च, प्रधानमन्त्री, अतीवमनोहारि । |

3. मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत । **½ × 10 = 5**

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुन: लिखिए ।

Fill in the blanks of the following short story with the help of the words given in the box below and rewrite the same.

**कथा** :

गङ्गा __(i)__ गङ्गोत्रीस्थानं निकषा गोमुखस्थलात् नि:सरति । तदनन्तरम् अनेका: नद्य: अस्यां __(ii)__ । एतासु अलकनन्दा महत्त्वपूर्णास्ति । __(iii)__ गङ्गाया: विशालं रूपं __(iv)__ । परं यथा यथा इयम् अग्रेसरति नैकेषां नगराणाम् औद्योगिकसमवायानां च __(v)__ एतां दूषयति । कानपुरे आगरानगरे च चर्मोद्योगानाम् अपशिष्टं __(vi)__ सम्मिल्य गङ्गाजलं __(vii)__ करोति । एतत्कारणात् कदाचन __(viii)__ जलीयजन्तूनां __(ix)__ अपि सूचना: प्राप्यन्ते । साम्प्रतम् एतादृश: काल: समागत:, यदा अस्माभि: अस्या: समस्याया: समाधानार्थं गम्भीरा: __(x)__ चिन्तनीया: ।

**मञ्जूषा**

| |
|---|
| उपाया:, हिमालये, मृत्यो:, मिलन्ति, हरिद्वारे, गंगाजले, विषाक्तम्, दृश्यते, मत्स्यादीनाम् अपशिष्टम् । |

4. मञ्जूषायां प्रदत्तपदानां साहाय्येन **पञ्चभि**: संस्कृतवाक्यै: ‘हिमालय:’ इति विषयम् अधिकृत्य वर्णनं कुरुत । **1 × 5 = 5**

मञ्जूषा में दिए गए पदों की सहायता से ‘हिमालय’ विषय का वर्णन **पाँच** संस्कृत वाक्यों में कीजिए :

With the help of the words given in the box below describe “Himalayas” in **five** sentences in Sanskrit.

**मञ्जूषा**

| |
|---|
| पर्वतमाला, हिमाच्छादितशिखरा:, सर्वोच्चपर्वत:, नद्य:, वनस्पतय:, खनिजा:, धार्मिकस्थानानि, देवभूमि:, तप:स्थली, योगिन:, साधव:, तप:, कुर्वन्ति । |

## खण्ड: ग (SECTION C) 30 अङ्का:

### अनुप्रयुक्तव्याकरणम्
### अनुप्रयुक्त व्याकरण
### Applied Grammar

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत : **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धिविच्छेद कीजिए :

Disjoin Sandhis in the underlined words of the following sentences.

(i) सत्यमेव जयते नानृतम् ।

(ii) वाण्येका समलंकरोति पुरुषम् ।

(iii) कृतप्रयत्नोऽपि गृहे न जीवति ।

(iv) निमज्जतीन्दो: किरणेष्विवाङ्क: ।

(v) शठास्तथाविधान् ।

(vi) सद्विद्या यदि किं धनै: ?

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहा लेख्या: : **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित समस्तपदों के विग्रह लिखिए :

Expound the underlined words of the following sentences.

(i) ऋषय: आप्तकामा: भवन्ति ।

(ii) अवलम्ब: रोलम्बकदम्बस्य ।

(iii) राजलक्ष्मी: दुराराध्या भवति ।

(iv) कृतप्रयत्न: अपि न जीवति ।

(v) सर्वे यथास्थानम् उपविशन्ति ।

(vi) अन्धकारे दीपदर्शनम् ।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गतप्रकृतिं प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत : **1 × 8 = 8**

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत दी गई प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets :

(i) एनम् एव (आ+श्रि+तुमुन्) _______ भवति परार्द्धसंख्या ।

(ii) तिष्ठ तिष्ठ न (गम् + तव्यत्) _______ ।

(iii) मत्स्यजीविभि: तत्सर: (निर्+मत्स्य+तल्) _______ नीतम् ।

(iv) न कदाचित् आर्यस्य निष्प्रयोजना _______ (प्र+वृत्+क्तिन्) ।

(v) _______ (रम्+अनीयर्) अयं दरिद्रभाव: ।

(vi) वेदा: एतस्य एव (वन्द्+इन्) _______ ।

(vii) _______ (पिशुन+तत्) यद्यस्ति ।

(viii) मृगेषु _______ (नि+शि+क्त) शरा: न प्रयोक्तव्या: ।

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयो: अन्विति: क्रियताम् : **1 × 5 = 5**

निम्नलिखित वाक्यों में कर्ता एवं क्रियापदों की अन्विति कीजिए :

Write the suitable verbs according to the subject in the following sentences :

(i) ईशोपनिषद् यजुर्वेदस्य चत्वारिंशत्तम: अध्याय: _______ । ((अस्ति/असि)

(ii) देव: चन्द्रगुप्त: शिरसा प्रणम्य _______ । (विज्ञापयति/विज्ञापयसि)

(iii) कस्मिंश्चिद् जलाशये त्रय: मत्स्या: _______ । (वसति/वसन्ति)

(iv) न खल्वहं नष्टां श्रियम् _______ । (अनुशोचसि/अनुशोचामि)

(v) आधुनिकै: वैज्ञानिकै: अपि तथैव _______ । (मन्यन्ते/मन्यते)

**अथवा/OR**

अधोलिखितेषु वाक्येषु विशेष्यै: सह मञ्जूषाया: विशेषणपदानि योजयत : **1 × 5 = 5**

निम्नलिखित वाक्यों में मञ्जूषा से विशेष्य के अनुसार विशेषण जोड़िए :

Write the appropriate adjectives from the box with the qualifying nouns in the following sentences :

(i) क्षुरस्य धारा ______ दुरत्यया ।

(ii) शिवराजविजये सूर्योदयस्य ______ वर्णनम् उपलभ्यते ।

(iii) चन्द्रगुप्तस्य ______ चाणक्य: सदा देशहिताय प्रयतते ।

(iv) राजा ______ कुसुमपुरम् अवलोकयितुम् इच्छति ।

(v) ______ बुद्धस्य विशालकाया मूर्ति: आकर्षणकेन्द्रम् ।

**मञ्जूषा**

| |
|---|
| भगवत:, निशिता, अमात्य:, विज्ञानमयम्, अतिरमणीयम् । |

9. अधोलिखितेषु वाक्येषु कोष्ठकपदैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत : **1 × 5 = 5**

निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों से उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks using appropriate case-endings with the words given in the brackets in the following sentences :

(i) आर्य! देवेन अहम् ______ चरणयोः प्रेषितः । (आर्य)

(ii) यदि एवं तर्हि शिष्येण ______ आज्ञा पालनीया । (गुरु)

(iii) शृणुत, ______ उपत्यकाभूमिं लद्दाख इति वदन्ति । (उत्तुङ्गपर्वत)

(iv) अहं ______ दूरमारोप्य पातितोऽस्मि । (पर्वत)

(v) त्रिपुरविमानस्य प्रथमः भागः ______ तले सञ्चरति । (पृथिवी)

## खण्डः घ (SECTION D) **35 अङ्काः**

### भाग – I

### PART – I

### पठितांश – अवबोधनम्

### पठितांश – अवबोधन

### Reading Comprehension

10. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेनोत्तरत :

निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose, verse and drama passage and answer the questions based on them in Sanskrit :

(क) **गद्यांशः**

"तेषां तत् कुलिशपातोपमं वचः समाकर्ण्य अनागतविधाता सर्वान् मत्स्यान् आहूय अवदत् – अहो! श्रुतं भवद्भिः यत् मत्स्यजीविभिः अभिहितम् ? तद् रात्रावपि गम्यतां किञ्चित् निकटं सरः । तन्नूनं प्रभातसमये मत्स्यजीविनः अत्र समागत्य मत्स्यसंक्षयं करिष्यन्ति ।"

**प्रश्नाः**

(अ) एकपदेनोत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कः मत्स्यान् आहूय अवदत् ?

(ii) के मत्स्यसंक्षयं करिष्यन्ति ?

(ब) पूर्णवाक्येनोत्तरत । **1**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

अनागतविधाता सर्वान् मत्स्यान् आहूय किं कर्तुम् आदिशत् ?

(स) यथानिर्देशमुत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'वच:' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम् ? ½

(ii) 'प्रात:' इत्यस्य स्थाने किं पर्यायपदम् प्रयुक्तम् ? ½

(iii) 'करिष्यन्ति' इति क्रियापदस्य कर्तृपदं किम् ? **1**

(iv) 'संग्रह:' इत्यस्य विलोमपदं किम् ? **1**

(ख) **पद्यम्**

"स किंसखा साधु न शास्ति योऽधिपम्
हितान्न य: संशृणुते स किंप्रभु: ।
सदानुकूलेषु हि कुर्वते रतिम्
नृपेष्वमात्येषु च सर्वसम्पद: ।।"

**प्रश्ना** :

(अ) एकपदेनोत्तरत । ½ × **2** = **1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) य: अधिपं साधु न शास्ति स किम् उच्यते ?

(ii) नृपेषु अमात्येषु च सदानुकूलेषु का: रतिं कुर्वते ?

(ब) पूर्णवाक्येनोत्तरत । **1**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

किंप्रभु: कीदृश: भवति ?

(स) यथानिर्देशमुत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'नृपेष्वमात्येषु' इत्यस्य विशेषणं किम् ? ½

(ii) 'रतिं कुर्वते' इत्यस्य कर्तृपदं किम् ? ½

(iii) 'दुष्ट: राजा' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ? **1**

(iv) 'सम्पद:' इत्यस्य विलोमपदं किम् ? **1**

(ग) **नाट्यांश** :

"कञ्चुकी – (प्रविश्य) इदम् आर्यचाणक्यस्य गृहम् । अहो ! राजाधिराजमन्त्रिणो विभूतिः । तथाहि गोमयानाम् उपलभेदकम् एतत् प्रस्तरखण्डम्, अत्र शुष्यमाणैः समिद्भिः अतिनमितः छदिप्रान्तः । जीर्णाः भित्तयः । (भूमौ निपत्य)जयतु आर्यः ।

चाणक्यः – वैहीनरे ! किम् आगमनप्रयोजनम् ?

कञ्चुकी – आर्य! देवः चन्द्रगुप्तः आर्यं शिरसा प्रणम्य विज्ञापयति – यदि कार्ये बाधा न स्यात् तर्हि आर्यं द्रष्टुम् इच्छामि ।"

**प्रश्नाः**

(अ) एकपदेनोत्तरत । ½ × **2** = **1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) गृहं कस्य अस्ति ?

(ii) शुष्यमाणैः समिद्भिः कः अतिनमितः ?

(ब) पूर्णवाक्येनोत्तरत । **1**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

चाणक्यस्य गृहे किं किम् अस्ति ?

(स) यथानिर्देशमुत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'उपलभेदकम्' इति पदं कस्य विशेषणम् ? ½

(ii) 'विज्ञापयति' इति क्रियायाः कर्तृपदं किम् ? ½

(iii) 'बहिः गत्वा' इत्यस्य किं विलोमपदम् ? **1**

(iv) 'पृथिव्याम्' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम् ? **1**

11. यथानिर्देशं प्रश्न**द्वयम्** उत्तरत । **2 + 2 = 4**

यथानिर्देश **दोनों** प्रश्नों के उत्तर दीजिए ।

Answer **both** the questions as directed.

(i) 'देव ! कः अन्यः जीवितुकामो देवस्य शासनम् अतिवर्तेत ?' – इदं वाक्यं कः कं प्रति कथयति ?

(ii) 'सौहृदानि सुजने शिथिलीभवन्ति' अस्याः पङ्क्तेः सन्दर्भग्रन्थं लेखकं च लिखत ।

12. प्रत्येकम् अंशस्य प्रदत्त-भावार्थ**त्रयात् एकं** शुद्धं भावार्थं चित्वा लिखत : **2 × 2 = 4**

प्रत्येक अंश के लिए दिए गए **तीन** भावार्थों में से **एक** शुद्ध भावार्थ का चयन करके लिखिए :

Pick out and write the correct **one** out of the **three** explanations given for each of the following lines :

(अ) 'लोभश्चेद्गुणेन किम् ?'

**भावार्थाः**

(i) यदि मनुष्ये एको लोभरूपी दुर्गुणः वर्तते तदा अन्येषां दुर्गुणानां का आवश्यकता ?

(ii) लोभिनि जने न कोऽपि गुणः भवति ।

(iii) यदि मनुष्ये लोभः अस्ति, तर्हि गुणैः न किमपि प्रयोजनम् ।

(ब) 'सद्विद्या यदि किं धनैः ?'

**भावार्थः**

(i) विदुषे धनस्य आवश्यकता भवति ।

(ii) यस्य समीपे श्रेष्ठा विद्या भवति, तस्य कृते अन्य धनानाम् आवश्यकता नास्ति ।

(iii) सज्जन पुरुषाय धनं नावश्यकम् ।

**अथवा / OR**

अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत : **1 × 4 = 4**

निम्नलिखित पद्य के लिए दिए गए भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुनः लिखिए :

Complete the central idea of the given verse with the words given in the box and rewrite the same.

"शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूला निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति, हुतं च दत्तं च सदैव तिष्ठति ।।"

**भावार्थः**

कालः सदैव ____ । कालेन प्राप्ता विद्या अपि शनैः शनैः ____ भवति । काले व्यतीते दृढा वृक्षाः अपि ____ भूत्वा भूमौ पतन्ति । जलस्य गन्तव्यस्थानमपि शुष्कं जायते । परन्तु ____ प्रदत्तं यज्ञाग्नौ प्रदत्तं च धनादिकं सदैव स्थिरं भवति ।

**मञ्जूषा**

| दीनेभ्यः, जीर्णाः, विस्मृता, परिवर्तनशीलः । |
|---|

13. अधोलिखितस्य श्लोक**द्वयस्य** प्रदत्तान्वये मञ्जूषातः पदैः रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत : **½ × 8 = 4**

निम्नलिखित **दो** श्लोकों के लिए दिए गए अन्वयों में मञ्जूषा के पदों से रिक्त स्थानों की पूर्ति कर अन्वय को पुनः लिखिए :

The prose order renderings of the following **two** verses have been given below. Fill in the blanks from the words given in the box and rewrite the same.

(अ) "निर्वैरा विमुखीभवन्ति सुहृदः स्फीता भवन्त्यापदः ।
पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते ।।"

**अन्वयः**

निर्वैराः ______ विमुखीभवन्ति, आपदः स्फीताः ______ परैः अपि च यत्पापं ______ कृतम्, तत् ______ सम्भाव्यते ।

(ब) "व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्, असंवृत्ताङ्गान्निशिता इवेषवः ।।"

**अन्वयः**

ये ______ मायिनः न भवन्ति ते ______ पराभवं व्रजन्ति ।
शठाः हि ______ इषव इव तथाविधान् ______ प्रविश्य घ्नन्ति ।।

**मञ्जूषा**

| मायाविषु, निशिताः, असंवृत्ताङ्गान्, मूढधियः,<br>कर्म, सुहृदः, भवन्ति, तस्य । |
|---|

14. अधोलिखितानां **'क'** – स्तम्भस्य वाक्यांशानां **'ख'** – स्तम्भस्य वाक्यांशै: सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुन: लिखत : **1 × 4 = 4**

निम्नलिखित **'क'** स्तम्भ के वाक्यांशों का **'ख'** स्तम्भ के वाक्यांशों के साथ सार्थक मिलान कर लिखिए :

Match the following sentences of the column **'क'** with the suitable sentences of column **'ख'** and rewrite the same.

| **(क)** | **(ख)** |
|---|---|
| (i) एष एव अङ्गीकरोति | (a) त्यागेन शीलेन गुणेन कर्मणा । |
| (ii) तं जलाशयं दृष्ट्वा | (b) चञ्चलायेते इव मेऽक्षिणी । |
| (iii) तथा चतुर्भि: पुरुष: परीक्ष्यते | (c) गच्छद्भि: मत्स्यजीविभि: उक्तम् । |
| (iv) गेहान्निष्क्रान्तस्य बुभुक्षया | (d) उत्तरं दक्षिणं चायनम् । |

15. अधोलिखितेषु वाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत : **1 × 4 = 4**

निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार सार्थक अर्थ चुनकर लिखिए :

Select and write the appropriate meanings of the underlined words in the following sentences :

(अ) 'एको हि दोषो गुणसन्निपाते ।'

(i) काले

(ii) समूहे

(iii) सन्निपातज्वरे

(ब) 'एष एव अङ्गीकरोति परार्द्धसंख्याम्'

(i) स्वीकरोति

(ii) प्राप्नोति

(iii) आच्छादयति

(स) 'सत्येन पन्था: विततो देवयान: ।'

(i) आकाश:

(ii) मार्ग:

(iii) पृथिवी

(द) 'आर्यप्रसादात् अनुभूयते एव सर्वम् ।'

(i) आर्यस्य भवनात्

(ii) आर्यस्य प्रसन्नतया

(iii) आर्यस्य कृपया

## खण्डः घ (SECTION D) **10 अङ्काः**

**भाग – II**

**PART – II**

**सामान्यः संस्कृतसाहित्यपरिचयः**

**सामान्य संस्कृत साहित्य परिचय**

**General Introduction to Sanskrit Literature**

16. (अ) अधोलिखितेषु कस्यापि **एकस्य** संक्षिप्तः परिचयः संस्कृतेन लेख्य : **5**

निम्नलिखित में से किसी **एक** का संक्षिप्त परिचय संस्कृत में लिखिए :

Write a brief note on any **one** of the following in Sanskrit :

भासः, भारविः, कालिदासः ।

**अथवा / OR**

अधोलिखितेषु मञ्जूषापदसहायतया रिक्तस्थानानि पूरयित्वा पुनः लिखत । **½ × 10 = 5**

निम्नलिखित में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पुनः लिखिए ।

Fill in the blanks in the following using the words from the box and rewrite the same.

(i) कालिदासस्य सर्वस्वम् ______ अस्ति ।

(ii) भारवेः एकमात्ररचना ______ वर्तते ।

(iii) वेदाः ______ सन्ति ।

(iv) ______ विश्वसाहित्यस्य प्राचीनतमो ग्रन्थः ।

(v) प्रमुखाः उपनिषदः ______ सन्ति ।

(vi) ______ विदूषकस्य, नायिकापात्रस्य च अभावः अस्ति ।

(vii) राज्ञः अमरशक्तेः शास्त्रविमुखान् राजपुत्रान् शिक्षयितुं ______ पञ्चतन्त्रस्य रचना कृता ।

(viii) अर्थशास्त्रस्य लेखकः ______ अस्ति ।

(ix) नाटकस्य अन्ते सर्वाणि पात्राणि मिलित्वा ______ प्रस्तुवन्ति ।

(x) महाकाव्यस्य विभाजनं ______ भवति ।

**मञ्जूषा**

| |
|---|
| सर्गेषु, अभिज्ञानशाकुन्तलम्, भरतवाक्यम्, किरातार्जुनीयम्, चाणक्यः, ऋग्वेदः, एकादश, चत्वारः, विष्णुशर्मणा, मुद्राराक्षसे । |

(ब) महाकाव्यस्य काः अपि **पञ्च** विशेषताः संस्कृतेन लिखत । **5**

महाकाव्य की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए ।

Write any **five** characteristics of the महाकाव्य literature in Sanskrit.